<u>संस्कृत वार्ता:</u>

दिनाङ्क : 01/05/2026 सायम् - 06:20

<u>मुख्यवार्ता:</u>

- बुद्धपूर्णिमावसरे अद्य केन्द्रीय-गृहमन्त्री अमित शाहः लेह-नगरस्य 'जीवत्सल' इति स्थाने तथागत-बुद्धभगवतः पवित्र-अवशेषाणां प्रदर्शिन्याः अकरोत् उद्घाटनम् ।
- भारतप्रशासनेन 'नागरिकता (संशोधन) नियमाः, अधिसूचिताः, येन 'भारतीय-विदेशी-नागरिक' (OCI) पत्रधारकाणां नागरिकता-आवेदनानां च सम्बन्धितेषु प्रबन्धेषु नवीनं परिवर्तनं विहितम्।
- पश्चिम-बङ्गालस्य मुख्य-निर्वाचन-अधिकारी मनोज-अग्रवालः अवोचत् यत् ममता-बेनर्जी 'ई.वी.एम्.' इत्याख्ये छलविषये यत् किमपि आक्षेपं कृतवती तस्य विषयस्य नैवास्ति आधारः ।
- विगते एप्रिल-मासे भारतस्य वस्तु-सेवा-करस्य आहत्य-सङ्ग्रहः गतवर्षस्य अपेक्षया अस्मिन् वर्षे अष्ट दशांश सप्त प्रतिशतं यावत् अधिकम् अस्ति।
- आई.पी.एल. क्रिकेट क्रीडायां अद्य सायं राजस्थान-रॉयल्स दलं दिल्ली केपिटल्स दलेन सह क्रीडिष्यति।

<u>अमित शाह - लेह</u>

बुद्धपूर्णिमावसरे अद्य केन्द्रीय-गृहमन्त्री अमित शाहः लेह-नगरस्य 'जीवत्सल' इति स्थाने तथागत-बुद्धभगवतः पवित्र-अवशेषाणां प्रदर्शिन्याः उद्घाटनम् अकरोत्। अस्मदीय-वार्ताहरैः सूचितं यत् पञ्चसप्तति-वर्षेभ्यः परं एते पवित्र-अवशेषाः लद्दाख-क्षेत्रे प्रत्यागताः सन्ति।

एषः प्रथमः अवसरः अस्ति यद् भगवतः बुद्धस्य पवित्र-अवशेषाः देशस्य अभ्यन्तरे कस्यापि प्रदर्शिन्याः कृते तेषां स्थायी-स्थानात् अन्यत्र आनीताः। प्रदर्शिन्याः उद्घाटनं विधाय श्री शाहः लद्दाख-वासिनं प्रति स्वीय-शुभकामनाः प्राकटयत्।गृहमन्त्रिणा उक्तं यत् "भगवतः बुद्धस्य ज्ञानम् तस्य पञ्चविंशति-शत-वर्षेभ्यः अनन्तरम् अपि अद्यत्वे युगे प्रासङ्गिकं वर्तते।" यत् एषः केवलं धार्मिकः उत्सवः नास्ति, अपितु एकः ऐतिहासिकः पुनर्मिलन-समारोहः अस्ति।

लद्दाखस्य उपराज्यपालः विनय कुमार सक्सेना, लद्दाख-सांसदः मोहम्मद हनीफा, विभिन्नेभ्यः बौद्धमठेभ्यः आगताः 'रिन्पोछे' च अस्मिन् कार्यक्रमे उपस्थिताः आसन्।

एषः उद्घाटन-समारोहः बुद्धपूर्णिमा-उत्सवेन सह सम्पन्नः, यत्र मठ-प्रार्थनाः सांस्कृतिकाः प्रस्तुतयः च अभवन्। एते अवशेषाः नवदेहल्यां 'राष्ट्रिय-संग्रहालये' सुरक्षिताः सन्ति। एतेषां प्राप्तिः उत्तर-प्रदेशस्य सिद्धार्थनगर-मण्डलस्य 'पिपराहवा' स्तूपस्य उत्खननेन अभवत्। विश्वस्मिन् हि विश्वे सर्वेभ्यः बौद्ध-अनुयायिभ्यः एते केवलं पुरातत्त्व-अवशेषाः न, अपितु श्रद्धायाः ज्ञानप्रकाशस्य च जीवन्त-प्रतीकाः सन्ति।

सर्वेभ्यः वीक्षकेभ्यः एते पवित्र-अवशेषाः श्वः आरभ्य अस्य मासस्य दशम-दिनाङ्कं यावत् लेह-नगरे स्थास्यन्ति, तदनन्तरं मई मासस्य एकादश द्वादश दिनाङ्कयोः जांस्कर-घाटी-क्षेत्रे नेष्यन्ते। प्रदर्शिनीं समेत्य ध्यान-सत्राणि, सर्वधर्म-सम्वादाः इत्यादयः अनेके सांस्कृतिक- शैक्षणिक-कार्यक्रमाः अपि आयोज्यन्ते।

बुद्धपूर्णिमा

अद्य कृत्स्ने हि देशे सश्रद्धं सहर्षं च 'बुद्धपूर्णिमा' आचर्यते।

एषः दिवसः न केवलं भगवतः गौतमबुद्धस्य जन्मोत्सवस्य प्रतीकः अस्ति, अपितु अस्मिन्नेव दिने सः बिहार-राज्यस्य बोधगयायाम् 'महाबोधि'-वृक्षस्य अधः निर्वाणं प्राप्तवान्। अयं दिवसः विश्वस्य सर्वेषां बौद्धानां हिन्दूनां च कृते स्मरणीयः वर्तते।

अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी मुर्मू, प्रधानमन्त्री नरेन्द्र मोदी, केन्द्रीय-गृहमन्त्री अमित शाहः, लोकसभा-अध्यक्षः ओम् बिड़ला च देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः।

राष्ट्रपतिः द्रौपदी मुर्मुः बुद्धपूर्णिमायाः अवसरे नागरिकेभ्यः वर्धापनानि यच्छन्ती, स्वकीये सन्देशे उक्तवती यत् अयं पवित्रः दिवसः भगवतः बुद्धस्य पृथिव्यां आगमनस्य, ज्ञानोदयस्य, महापरिनिर्वाणस्य च युगान्तकारीणां घटनानां प्रतीकभूतोऽस्तीति। तस्य अनुकम्पया, अहिंसायाः, शान्तेः, ज्ञानस्य च अनन्तसन्देशाः सम्पूर्णां मानवजातीम् अविरतं मार्गदर्शयन्तीति च सा अवोचत्।

नागरिकता संशोधन

भारतप्रशासनेन 'नागरिकता (संशोधन) नियमाः, 2026' इति अधिसूचिताः, येन 'भारतीय-विदेशी-नागरिक' (OCI) पत्रधारकाणां नागरिकता-आवेदनानां च सम्बन्धितेषु प्रबन्धेषु नवीनं परिवर्तनं विहितम्। गृह-मन्त्रालयेन नवाधिकद्विसहस्र तमवर्षस्य

नागरिकता-नियमेषु संशोधनं कृत्वा राजपत्राधिसूचनायाः माध्यमेन एतानि परिवर्तनानि सूचितानि।

मन्त्रालयेन स्पष्टीकृतं यत् कोऽपि अल्पवयस्कः बालकः कस्मिन्नपि काले भारतीय-पत्रेण सह अन्यस्य कस्यापि देशस्य पत्रं धारयितुं न शक्नोति। अधिसूचनानुसारं, OCI-पत्रस्य पञ्जीकरणाय अथवा तस्य त्यागाय सर्वाणि आवेदनानि अधुना आधिकारिक-जालपुटे एव प्रस्तोतव्यानि भविष्यन्ति। मन्त्रालयेन अभ्युपगतं यत् OCI-पत्रधारकत्वेन पञ्जीकरणार्थं निर्दिष्टानि प्रपत्राणि केवलं निर्णीते अन्तर्जाल-पटले पूरणीयानि।

पश्चिम बंगाल – ममता बनर्जी

पश्चिम-बङ्गालस्य मुख्य-निर्वाचन-अधिकारी मनोज-अग्रवालः अवोचत् यत् ममता-बेनर्जी 'ई.वी.एम्.' इत्याख्ये छलविषये यत् किमपि आक्षेपं कृतवती तस्य विषयस्य आधारः नैवास्ति । सः अवदत् यत् मतगणनाकेन्द्रेषु सी.सी.टी.वी. माध्यमेन अहोरात्रं अविरतंच निरीक्षणं प्रचलति, पर्याप्तं केन्द्रीय-बलं च नियुक्तम् अस्ति, अतः तत्र दोषस्य अवकाशः नैव वर्तते।

जी.एस.टी

विगते एप्रिल-मासे भारतस्य वस्तु-सेवा-करस्य आहत्य-सङ्ग्रहः द्विचत्वारिंशतसहस्राधिक द्विलक्ष-कोटि-रूप्यतोप्यधिकं वर्तते यदिह ऐतिहासिकं कीर्तिमानं अस्ति। गतवर्षस्य अपेक्षया अस्मिन् वर्षे अष्ट दशांश सप्त प्रतिशतं यावत् वृद्धिः अभवत्।

अन्तर्राष्ट्रिय-श्रमिक-दिवसः

अद्य विश्वस्मिन् हि विश्वे 'अन्ताराष्ट्रिय-श्रमिक-दिवसः' आचर्यते। अयं दिवसः 'मई-दिवसः' इति नाम्ना अपि प्रसिद्धः अस्ति। अस्य दिवसस्य मुख्यम् उद्देश्यं विश्वे आर्थिक-सामाजिक-अधिकारान् प्राप्तुं श्रमिकैः कृतानां त्यागानां प्रति श्रद्धाञ्जलिः अर्पणं च अस्ति।

आई.पी.एल

आई.पी.एल. क्रिकेट क्रीडायां अद्य सायं जयपुरस्य सवाई-मानसिंह क्रीडांगणे राजस्थान-रॉयल्स दलं दिल्ली केपिटल्स दलं सम्मुखी करिष्यति।

सहैव क्रीडेयं सायं सार्ध सप्त वादने भविता। गुजरात-टाइटन्स्-दलं गतरात्रौ अहमदाबाद्-नगरस्य नरेन्द्र-मोदी-क्रीडाङ्गणे रायल्-चालेंजर्स्-बेङ्गलुरु-दलम् चतुस्तोभैः पराजयत।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।। इति वार्ता: ।।